# द्वितीयोऽध्याय:

— १ परिभाषेन्दुशेखरे प्रकरणानि

२ परिभाषेन्दुशेखरस्य टीकानां-
परिचयात्मकं विवेचनम् तत्र-
भूति विजया टीकयो: स्थानञ्च

परिभाषेन्दु-शेखरे प्रकरणानि

परिभाषेन्दु-शेखरस्य भूति प्रभृति व्याख्या पर्यालोचने नावगम्यते - यद् व्याख्या यामस्यां त्रीणि प्रकरणानि सन्ति । शास्त्रत्व-सम्पादकं प्रथमं - प्रकरणम्, बाध बीज कथनं द्वितीयम्, शेषार्थकथनंच तृतीयम् । "तत्र "व्याख्यानतो - विशेष प्रतिपत्तिर्नहि सन्देहादलक्षणम्"[1] इत्यत आरभ्य "एकदेश - विकृतमनन्यवत्"[2] - इत्येतत्पर्यन्तं प्रथमं प्रकरणम् । तदनु "पूर्वपर-नित्यान्तरङ्गापवादानामुत्त-रोत्तरं बलीयः"[3] इत्यारभ्य "उभयनिर्देशे पंचमी-निर्देशो बलीयान्"[4] इत्येत-त्पर्यन्तं द्वितीयं प्रकरणम् । ततश्च "प्रातिपदिकग्रहणे लिङ्ग विशिष्टस्यापि - ग्रहणम्"[5] इत्यारम्य "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्तेवैयाकरणाः"[6] इत्यतेत्पर्यन्तामन्तिमं तृतीयं प्रकरणम् ।

एवंच प्रकरणविभाजनं विधाय प्रथमे प्रकरणे शास्त्रत्वसम्पादकं - प्रथमं प्रकरणमित्यन्वर्थक- शास्त्रत्वसम्पादिकानां परिभाषाणां निवेशः कृतः - ग्रन्थकृता । अप्रामाण्य ज्ञानानास्कन्दित बोधजनकत्वमेव शास्त्राणां शास्त्रत्वम् ।

---

1- परिभाषा- 1

2- परिभाषा-37

3- परिभाषा-38

4- परिभाषा- 71

5- तदेव - 72

6- तदेव - 133

अप्रामाण्य ज्ञानानास्कन्दित बोधं विनेष्टानिष्ट स्थल प्रवृत्ति निवृत्ती न - भवतो लोकानाम् ।

एतदनन्तरं प्रथमप्रकरणे व्याख्यातृभिः परिभाषाभिः सूत्राणां - शास्त्रत्वे प्रतिपादितेऽपि उत्पद्यत एवेयं जिज्ञासा यद् तिसृणामित्यत्र त्रयादेशस्य - तिस्रादेशस्य च प्राप्तिर्वर्तते । तत्र त्रयादेश-तिस्रादेशयोर्मध्ये कतरस्य प्रवृत्तिः - स्याद् ? द्वयोः प्रवृत्तौ त्वनिष्टमेव जायेत । "विप्रतिषेधे परं कार्यम्"[1] इत्यनेन - परत्वाद् तिस्रादेशस्य प्राक् प्रवृत्ति-प्रतिपादनेऽपि पुनस्त्रयादेशप्रवृत्तिः केन - निवार्यत इति शङ्का वरीवर्त्येव । तस्या निरासार्थं "सकृद्गतौ विप्रतिषेधे - यद् बाधितं तद् बाधितमेव"[2] इत्यस्या उपन्यासः कृतस्तस्याश्च पुनर्बाधो- बोधितः ।

एवं पूर्वापेक्षया परस्य बलवत्वं सम्पादितम् । तच्च शास्त्रेण न - स्यादिति बाधचिन्ताया उपयोगः प्रदर्शितः । तदर्थमेव "पूर्वपरनित्यान्तरङ्गा- पवादानामुत्तरोत्तरं बलीयः"[3] इत्यारभ्य "उभयनिर्देशे पंचमीनिर्देशो- बलीयान्"[4] इत्यन्तं बाधबीजाख्यं द्वितीयं प्रकरणमारब्धम् ।

ततश्च प्रकरणद्वयावशिष्टानां कासांश्चिद् परिभाषाणां व्याख्यान - मन्तिमे प्रकरणे समुपलभ्यते । तथा च प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि - ग्रहणम्[5] "विभक्तौ लिङ्गविशिष्टाग्रहणम्"[6] इत्याभ्यां परिभाषाभ्यां पूर्वोक्तं -

---

1- पा०सू० 1/4/2

2- परिभाषा- 40

3- तदेव - 38

4- तदेव 71

5- तदेव -72

6- तदेव 73

शास्त्रत्वमेव सम्पाद्यते । एवं विधा अनेका परिभाषा अत्रप्रकरणे वर्तन्ते यासां – साक्षात्परम्परया शास्त्रत्व साहाय्यसम्पादने एव व्यापारो विलोक्यते । अतस्तासां प्रथमतन्त्रावशिष्टत्वं निश्चप्रचमेव । एवं काचन द्वितीय प्रकरणाव – शिष्टा अपि यथा – 'सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् भवेत्'[1] – 'निषेधाश्च बलीयांसः'[2] इत्यादयः । एतद् भिन्ना अपि काश्चन विलोक्यन्ते, – यथा –"पर्याय शब्दानां लाघवगौरवचर्चा नाद्रियते"[3] इत्यादयः ।

एवंच प्रकरणस्येत्थं विभाजने किं बीजमिति शङ्का जागर्त्येव – शब्दशास्त्र-तत्त्वज्ञानां मनसि । तत्रेत्थं वक्तुं शक्यते यत् – परिभाषेन्दुशेखरस्य – तत्तद् व्याख्या-दर्शनेनेदमवगम्यते यद् ग्रन्थस्यास्य व्याख्यान कर्तृणामासीत् काचन – महती परम्परा । तस्यां परम्परायां विद्यमानानां प्रतिभासम्पन्नानां केषांचन व्याकरण शास्त्र-तत्त्वज्ञानां तस्यां दिशि दृष्टिपातः स्वाभाविकश्छात्राणा – मध्ययन-सौविध्यायैवेति । इदमपि कल्पयितुं शक्यते यत् पूर्वाचार्य व्याख्यात परि-भाषातिरिक्ता याः परिभाषाः श्रीमताविदुषानागेशेन पश्चात् सङ्कलितास्ताः – क्रममनादृत्य परिशिष्टे प्रकरणे निवेशिता इति । अत्र युक्तायुक्तत्वंच सुधीभि-रूहनीय मित्यलमधिकेन ।

---

1- परिभाषा- 100

2- तदेव - 121

3- परिभाषा - 124

परिभाषेन्दु शेखरस्य टीका:

अष्टा दश शताब्दस्य पूर्वार्द्धे सप्तदश शताब्दस्योत्तरार्द्धे वा नागेश-भट्ट: संजात: । अस्य महनीया कृति: परिभाषेन्दु-शेखरो वर्तते इत्यस्मिद्विवेच्यो-विषय: शोध प्रबन्धस्य। यद्यपि इतोऽपि पूर्वं व्याडि-पुरुषोत्तमदेवसीरदेवादिभि:-परिभाषाविषयका: ग्रन्था: रचिता किन्तु नागेशस्यायं परिभाषेन्दु-शेखरो-यादृशीं प्रतिष्ठांजगाम तादृशीं न केनापि पूर्वरचितेन परिभाषाकारेणेति ।

ग्रन्थमिममधिकृत्य त्रिंशत्तोऽप्यधिका व्याख्या: प्राप्यन्ते । तत्र - विंशतित्तोऽप्यधिका व्याख्या प्रकाशितास्तथावशिष्टा: मातृका-रूपेण सुरक्षिता: सन्ति ।[1]

डा० कीलहार्न निर्दिष्ट तालिकया एक विंशति टीकानां ज्ञानं भवति । अत्र योगेश्वर-शास्त्रि विरचित हैमवती व्याख्याया उल्लेखो नास्ति । डा० कीलहार्न महानुभावानन्तरमपि टीकाद्वयमत्र दृश्यते ।

---

1 The total number of commentaries to have been written on the Paribhāsenduśekhar exceeds thirty out of which about twenty commentaries are easily available now either printed or in a manuscript form.

K.B. Abhyankar,
and Vasudeva Shastri, Paribhasenduśekhar,
Introduction, page no. 35.

## डा० कीलहार्न कृता परिभाषेन्दुशेखरे टीकाकाराणां सारिणी

- नागेशभट्ट
  - वैद्यनाथपायगुण्डे गदा काशिका-1
    - बालम्भट्ट पायगुण्डे
      - मन्युदेव दोषोद्धरण-4
    - नीलकण्ठशास्त्री थाटे
      - राघवेन्द्राचार्य गजेन्द्रगडकर त्रिपथगा-3
        - माधवाचार्यवैकर तरंगिणी-5
        - अनन्तशास्त्रीपण्डारकरकर
          - डा०कीलहार्न
    - केशवभट्टशास्त्री
      - यशवन्तशास्त्री भट्ट
        - नीलकण्ठ शास्त्रीभट्ट
          - विष्णुशास्त्रीभट्ट विष्णुभट्टी:-8, चन्द्रिका 9
            - भास्करशास्त्री अभ्यङ्कर भास्करी-6
              - काशीनाथशास्त्री अष्टपुत्रे परिभाषेन्दुशेखर टीका-12
              - रामशास्त्रीगडवोले
              - अनन्तशास्त्री पण्डारकर
            - गोपालाचार्य करहडकर दुयण्डे-9
              - नारायणशास्त्रिखगल नागेशाशयनिर्णय-11
            - गोविन्दशास्त्री अष्टपुत्रे भावार्थदीपिका-7
    - भैरवमिश्र भैरवी-2

हरिशास्त्रीभागवत
वाक्यार्थ चन्द्रिका-13

राजारामशास्त्री कालेकर
- बालशास्त्रीराणाडे परिभा० व्याख्या -14

वासुदेवशास्त्री अभ्यङ्कर
तत्वादर्श-22
- के वी अभ्यङ्कर स० परिभाषेन्दुशेखर

डा० कीलहार्न
स० परिभाषेन्दुशेखर

(बालशास्त्रीराणाडे के शिष्य)

शिवकुमारशास्त्री
परिभाषा टीका-15
- जयदेवमिश्र
  विजया-17
  - वेणीमाधवशास्त्री,
    शास्त्रार्थकला-21

तात्याशास्त्री पटवर्धन
भूति-16

दामोदरशास्त्री
भारद्वाज
- गणपतिशास्त्रीमोकाटे
  तत्वप्रकाशिका-18
  (इयटीका भूति व्याख्याति)

गोविन्दशास्त्रीभारद्वाज
अम्बाकर्त्री-19

विश्वनाथदण्डिभट्ट
परिभाषेन्दु[illegible]
-20

(1) गदा

एतासु टीकासु सर्वप्रथमा टीकानागेशस्य पटशिष्येण श्री वैद्यनाथ-पायगुण्डे-महोदयेन गदा-काशिका विरचिता । अस्यां टीकायां नागेशस्याशयस्य सम्यग् विवेचनं कृतमस्ति । श्रूयते च विबुधैः यन्नागेशेनापि टीकेयमवलोकिता-आसीद ।

(2) भैरवी

भैरव मिश्रविरचित भैरवीति नामिका द्वितीया टीका अस्ति । अयं भैरवमिश्रः नागेशस्यैव शिष्यः इति डा0 कील हार्न महाभागस्य मतमस्ति । परिभाषेन्दु शेखरस्यांगलानुवादभूमिकया अवगम्यते यदा चार्य बलदेवोपाध्यायोऽपि मतमस्य स्वीकरोति ।

भैरवी व्याख्या भूमिका लेखक श्रीसदाशिव-महाभागानुसारेण अस्याः व्याख्यायाः सारल्यं निर्विवादमस्ति ।[1]

सम्प्रति इतः प्राचीनां गदामतिरिच्य न काऽपि टीका समुपलभ्यते । भवदेवात्मज-भैरवमिश्र कृत भैरवी[2] व्याख्या 1835 खिष्टाब्दे समध्यगच्छत ।

---

1. परिभाषेन्दु शेखर भैरवी व्याख्या भूमिकायां सदाशिव जोशी, पृ. 5
2. भैरवमिश्र कृता परिभाषा वि‍वृ‍ते, पृ. २४३

भैरवमिश्रकृतभैरवी व्याख्यायां तत्त्व प्रकाशिके तिनामिका – अपरा व्याख्या लक्ष्मणशर्मणा संगृहीता वर्तते । इयं तत्त्व-प्रकाशिका भूतौ – गणपति-शास्त्रि-विरचित तत्त्वप्रकाशिकात: भिन्नावर्तते । कोऽयं लक्ष्मण – शास्त्रीति नावगम्यते । अथ च केनेयं तत्त्व-प्रकाशिका विरचिताइत्यपि – नावगम्यते । तथाऽपिअस्या: टीकाया: उपलब्धता कस्यापि विशिष्टस्या – चार्यस्य सत्तां स्थापयति । अस्या: टीकाया उल्लेख: डा0 कीलहार्न-महोदयेन न कृतोऽस्ति ।

V-51250

§3§ त्रिपथगा

काशी विद्वन्मण्डलीषु साम्प्रतमपि परम्परया त्रिपथगाया महनीयं – स्थानमासीदिति ज्ञायते । अस्या: लेखक: श्री राघवेन्द्राचार्य गजेन्द्रगडकर आसीत् । अयं नागेशसदृशो विद्वानासीत् । प्रसिद्धनीलकण्ठ शास्त्रिण: शिष्यस्य विषमी, प्रभा, त्रिपथगेत्यादयो व्याख्या: अतीव प्रमुखा: सन्ति । सम्प्रत्यपि आदरेण एतासां व्याख्याना मध्ययनाध्यापनादिकं क्रियते विद्वद्भि: । तत्रापित्रिपथगाया अत्यन्त महनीयं स्थानमासीत् । काशीविद्वन्मण्डलीषु इतिकेलकरमहोदयेनोच्यते ।[2]

---

1- सम्प्रति वाराणसेयादि विद्यालयेषु प्रचलिताध्यापनशैल्यनुसारेण – तत्प्रवराणामपि छात्राणामध्ययनाय लक्ष्मण शर्मणा संगृहीतया तत्त्व प्रकाशिकया च समलङ्कृतोऽयं ग्रन्थ: । परिभाषेन्दु-शेखरे भैरवीव्याख्या- भूमिकायाम् सदाशिव शास्त्री जोशी, पृ05

2- संस्कृत विद्या पुनरुज्जीवन द्वितीयसरकरणं §पुणे§ पृ0 49-50

§4§ दोषोद्धरण

परिभाषेन्दुशेखरस्य रचयितुः पट्टशिष्य गदाकार श्रीवैद्यनाथ पायगुण्डे-महानुभावस्य शिष्येण मन्युदेवेन दोषोद्धरणनामकमेकं विवरणमत्र लिखितम् । वस्तुतस्तु तात्कालिकैं र्विपश्चितैर्ये दोषाः प्रकटीकृतास्तेषां निवारणायेद मस्ति विवरणम् ।

§5§ तरङ्गिणी

माधवाचार्य विरचित तरङ्गिणी परिभाषेन्दुशेखरे उपलभ्यते । इयं सम्पूर्णग्रन्थं न व्याख्याति अपितु इयं टिप्पणीवास्ति । डा० कीलहार्नप्रदत्त-तालिकया अनुमीयते यदयं राघवेन्द्राचार्य गजेन्द्र गडकरमहानुभावानां शिष्य – आसीदिति । इयं टीका क्वापि ख्यातिं न जगाम ।

§6§ भास्करी

भास्करी नामिका टीका भास्कर-शास्त्री अभ्यङ्कर महाभागेन-लिखिताऽस्ति । अयं भास्कर शास्त्री नीलकण्ठ शास्त्रिणः शिष्य आसीत् । अयं सताराप्रदेशे लब्धप्रतिष्ठः महा-वैयाकरणः व्याकरणशास्त्रे योग्यताविशेषो-पलब्धये काश्यां प्रसिद्धः श्रीकाशी नाथ शास्त्री स्वपित्राऽस्यैव तन्निधौ प्रेषितः । अस्यैव शिष्येण श्रीअनन्त शास्त्री-पण्डारकर महानुभावेन डा०कील-हार्न महाभागो व्याकरणशास्त्रमध्यापितः । भास्करी सम्प्रति नावाप्यते । अतः कीदृशीयं व्याख्यासी-दिति भास्करशास्त्रिणः पाण्डित्यादेवावगन्तुं शक्यते ।

अस्यापराच्छिष्यात् श्री राम शास्त्री गडबोले महानुभावाद् वासुदेव शास्त्रीअभ्यङ्करमहाभागः व्याकरणशास्त्र मध्यगीष्ट ।

(7) भावार्थदीपिका

महाराष्ट्रस्य प्रख्यातसाहित्यक श्रीनरसिंह चिन्तामणि केलकर-महानुभावेन "संस्कृत विद्यापुनरूज्जीवन" नामके स्वीये ग्रन्थे गोविन्दाचार्य-अष्टपुत्रे महानुभावस्य नाम सादरमाख्यातम् । एतेनेदं प्रतीयते यदयं महाराष्ट्रस्य-तात्कालिके विद्वन्मण्डलीषु प्रधान आसीत् । अयमेव गोपालाचार्यकरहडकर सदृश-विदुषः शिष्यस्य गुरूरासीत् । अस्य पिता काशिनाथ अष्टपुत्रेमहाभागः इत्यपि-अनेनैवपुस्तकेन ज्ञायते । गोविन्दाचार्येण भावार्थ दीपिकेति नाम्नैका परिभाषे-न्दुशेखर-व्याख्या रचितेति डा0 कीलहार्न प्रदत्तातालिकयाऽवगम्यते ।

(8) विष्णुभट्टी चन्द्रिका च ।

वैद्यनाथ-पायगुण्डे महानुभावस्य एकस्य शिष्यस्यनाम केशवभट्ट आसीत् । तस्यैव वंशजः श्री विष्णु शास्त्रीभट्टः परिभाषेन्दुशेखरस्य व्याख्याद्वयं व्यलिखत् । एका विष्णु भट्टी अपराचन्द्रिका चेति । तत्र चन्द्रिका प्रकाशिता विद्यते । विष्णुभट्टीति व्याख्या-विषये न किमप्यवगम्यते । डा0 कीलहार्न प्रदत्त तालिकायां-डा0 हर्ष नाथ मिश्रस्य-परिभाषेन्दुशेखरभूमिकायाः टीकासम्पत्तिः इति नामके-प्रकरणे एतस्याः उल्लेखमात्रंदृश्यते ।[1]

(9) दुष्करदोद्भेदः

परिभाषेन्दुशेखरेदुष्करदोद्भेद नाम्नैका टीका प्राप्यते यस्य लेखको-महामहोपाध्याय श्री गोपालाचार्य करहडकरमहानुभावोऽस्ति । डा0 कीलहार्न-तालिकयाऽवगम्यते यदयं वैद्यनाथपायगुण्डे महाभागस्य शिष्यस्य श्री नीलकण्ठ-शास्त्रिणः शिष्य आसीत् । किन्तु बलदेवोपाध्यायेन स्वीये ग्रन्थे[2]

---

1- दुर्गा व्याख्याभूमिका पृ0 66

2- काशीकी ... 154

अयं काशीनाथ शास्त्री अष्ट पुत्रे महानुभावस्य पितुः श्री गोविन्दाचार्य महाभागस्य — शिष्य आसीदिति स्वीक्रियते ।[1]

## ﴾10﴿ नागेशाशय निर्णयः

नागेशाशय निर्णय नामिकैका टीका नारायण शास्त्रिगलेतिनाम्ना — विद्वषा रचितेति लभ्यते । अयं महामहोपाध्याय श्री गोपालाचार्य कर हडकर महानुभावस्य शिष्य आसीदिति डा० कील हार्न तालिकया प्राप्यते । नारायण शास्त्री — कुण्टे नामको वैयाकरणः काशीनाथ शास्त्रिणः शिष्य आसीदिति बलदेवोपाध्याये — न विरचिते स्वीये पुस्तके निर्दिष्टं वर्तते ।[2] कीलहार्न निर्दिष्ट तालिकातो — घटकोऽयं नारायण शास्त्री एवेति उभयोः समकालत्वमेवात्र विनिगमकम् ।

## ﴾11﴿ श्री गङ्गाराम त्रिपाठि विरचित परिभाषेन्दुशेखर-टीका

श्री गङ्गाराम शास्त्री व्याकरणे प्रचलित परिष्कारपद्धत्या जन्मदाता — आसीत् । अस्य पिता बल्योद्धातः अष्टादशशताब्द्या उत्तरार्द्धे काशीमागतः । अत्रैव श्री त्रिपाठी महाभागानां शिक्षा दीक्षा अभूत् । अनेन परिभाषेन्दु शेखरे — लघुशब्देन्दुशेखरे च टीके लिखिते । अत्र नव्यन्याय शैल्याः प्रयोगं विधाय — व्याख्यायां नूतना शैली समुद्भाविता या परिष्कारपद्धतीति नाम्ना लोके —

---

1- काशी की पाण्डित्य परम्परा पृ० 154

2- तदेव पृ० 164

प्रचलिता वरीवर्ति । उभेऽपि पुस्तके महामहोपाध्याय श्री नित्यानन्द पर्वतीय — महानुभावस्य पार्श्वेसुरक्षिते स्त: । एताभ्यां श्री त्रिपाठिमहानुभावानां व्याख्या — शैल्या: परिचयो भवति । डा0 कीलन्हार्न प्रदर्शित तालिकायामस्योल्लेखो न — दृश्यते । सम्प्रति ग्रन्थोऽयं नित्यानन्द महानुभावस्य दौहित्रस्य पाण्डेयोपाधि-भूषित श्री गोपालदत्तमहाभागस्य सङ्ग्रहालये सुरक्षितो वरीवर्ति ।

§2§ काशीनाथाष्टपुत्रे विरचित परिभाषेन्दु शेखर टीका

काशीस्थ राजकीय संस्कृत महाविद्यालयस्यारम्भसमये विदुषां — परिचयप्रसङ्गे काशीनाथाष्टपुत्रे महानुभावस्य नामाग्रगण्योऽस्ति । अयं गोविन्द — शास्त्री अष्ट पुत्रे महाभागस्य तनयोवर्तते । भास्करशास्त्री अभ्यङ्कुरोमहाशयो-ऽस्यगुरुरासीत् । परिष्कार पद्धति: अस्यैव योगदानेन पल्लविता पुष्पिता च — जाता । एषां त्रयो मूर्धन्या: शिष्या बभूवु: ।

§1§ राजाराम शास्त्री कार्लेकर: ।

§2§ बाल शास्त्री राणडे ।

§3§ योगेश्वर शास्त्री ।

डा0 कीलहार्न संसूचित तालिकयाऽवगम्यते यदनेनापि टीकैका — परिभाषेन्दु शेखरे लिखिता।परिभाषेन्दु शेखरस्य पण्डित योगेश्वरशास्त्रिविरचित — हैमवती-व्याख्या पर्यालोचने नापि एतदवगम्यते यद् योगेश्वरशास्त्रिण: गुरूणाऽपि — टीकैका रचितासीत्[1]। योगेश्वर शास्त्रिणो गुरु: पण्डित राजाराम शास्त्री अपि — आसीत् । किन्तु नानेन काऽपि टीका लिखितेति बलदेवोपाध्याय विरचिते —

---

1- तदेव नेति गुरुचरणा: हैमवती व्याख्या पृ0 262

"काशीकी पाण्डित्यपरम्परा" नामके पुस्तके कार्लेकरमहाशयस्य परिचय प्रसङ्गे — नावगम्यते ।

§13§ साशासार विवेक:

पं0 बालशास्त्री राणाडे स्वसमये मूर्धन्यो विद्वान् काश्यां मन्यतेस्म । सर्वत: प्रथममनेन काशीनाथ शास्त्रिण सन्निधौ विद्यामधिजगाम तत: परं राजा-रामशास्त्रिण: सकाशं शिष्यत्वं स्वीचकार । अनेन परिभाषेन्दुशेखरे सारासार — विवेक नामिका टीका लिखिता । डा0 कीलहार्न निर्दिष्टतालिकायामस्या — व्याख्याया: नामापि नास्ति किन्त्वयं ग्रन्थ: प्रकाशित: आसीत् ।

§14§ हैमवती

पं0 योगेश्वर शास्त्रि विरचिता परिभाषेन्दु शेखर व्याख्या हैमवती नामिका — सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पं0 शिवकुमार शास्त्रि ग्रन्थमालायां पं0 — श्रीकालिकाप्रसाद शुक्ल-महानुभावानां सम्पादकत्वे 1975 ख्रिष्टाब्दे प्रकाशिता । डा0 कील हार्न निर्दिष्ट तालिकात अस्य ग्रन्थस्योल्लेखो न दृश्यते किन्तु सम्प्रति — सौलभ्येन सर्वत्रोपलभ्यते । योगेश्वरशास्त्री काशीनाथ शास्त्रिण राजाराम शास्त्रिण — श्च शिष्य आसीत् । लेखकस्यास्य एकैवेयं कृति: महत्वपूर्णा परिष्कारपद्धति-माश्रित्य लिखिताऽस्ति ।

------------

1- उन्होंने व्याकरण शास्त्र में दो ग्रन्थों का प्रणयन किया, जिनमें एक तो महाभाष्य पर टिप्पणी तथा दूसरा परिभाषेन्दु शेखर पर सारासार विवेक नामक व्याख्यान - काशी की पाण्डित्यपरम्परा बलदेवोपाध्याय, पृ0 189

‖15‖
भूतिः पं0 शिव कुमार शास्त्रिकृत परिभाषेन्दुशेखर टीका

म0म0 बालशास्त्रिणः शिष्य पं0 शिवकुमार शास्त्री काश्यामतीव –
प्रतिभावान् विद्वान्बभूव । अस्य अनेके शिष्याः यशस्विनः आसन् । अस्यैवशिष्यः–
विजयाकारः श्रीजयदेव मिश्र आसीत् । डा0 कीलहार्न प्रदर्शिततालिकानुसारेण –
परिभाषेन्दुशेखरस्यैका टीका वर्तते महानुभावस्यास्य किन्तु नोपलभ्यते सा
साम्प्रतम् ।

‖16‖ भूतिः परिभाषेन्दुशेखरस्य पटवर्धनोपाख्य श्रीराम कृष्णेनापि –
टीकैका टीकिता यस्या नाम भूतिरस्ति । लेखकस्यास्यापरं नाम तात्याशास्त्री –
आसीत् । भूतिः प्रसिद्धा टीका विद्यते । अस्याः टीकायाः काश्चित् स्वीयाः –
विशेषताः सन्ति याभिः अद्यापि बुधजनसमाजे इयं परां प्रतिष्ठां धारयति । –
अयं बाल शास्त्रिणः शिष्यः आसीत् । पटवर्धन शास्त्रिणः एकैवेयं कृतिः –
यया सः आदरेण अद्यापि स्मर्यते । अत्रापि परिष्कार पद्धत्याः लेखकेन कृतमस्ति –
किन्तु अनपेक्षितं काठिन्यमत्र न दृश्यते ।

‖17‖ विजया

पं0 शिवकुमार शास्त्रिणः प्रधानशिष्यः पं0 जयदेव मिश्रोमैथिल आसीत् ।
अनेन परिभाषेन्दुशेखरे विजया नाम्नी महनीया टीका टीकिता । परिष्कार पद्धत्याः गरीयान् ग्रन्थोऽयम् स्थाने भूतिकारस्य पटवर्धनोपाख्यस्य श्रीरामकृष्णास्य –
मतं खण्डयति क्वचन समर्थयति च । इयं टीका अद्यापि लोकप्रिया वर्तते । पुरा –
त्रिपथगा काशीस्थबुधजनसमाजे सम्मानार्हा आसीत् । उदितायां भूतौ तस्याः आदरः-
आदरस्तन्नासीत् ।

साम्प्रतं भूतिविजययो: पठनपाठनपद्धति: सर्वत्र प्रचलति ।

§18§ तत्त्व प्रकाशिका

शास्त्रार्थमहारथस्य श्रीदामोदर शास्त्रिण: शिष्य: श्री मोकाटे — इत्युपाख्य गणपतिशास्त्री तत्त्वप्रकाशिकाकार: आसीत् । इयं टीका भूति — भूषित परिभाषेन्दु शेखरस्य विद्यते । अत्र मूलेन साकं भूतेरपि व्याख्या दृश्यते। अयंबहुकालंयावत् काशीस्थ संस्कृत पाठशालाया: प्रधानाचार्य आसीत् ।

§19§ अम्बाकर्त्री

पं0 बाल शास्त्रिण: शिष्येण श्रीदामोदरशास्त्रिणो भ्रात्रा श्री गोविन्दशास्त्रिणा परिभाषेन्दु-शेखरे अम्बाकर्त्रीति नाम्ना टीकैका निर्मिता । पं0 गोविन्द शास्त्रिण: — अध्यापनक्षेत्रं बंगप्रदेश राजधानी-कलिकाता आसीत् एतद् टीका अधुना नोपलभ्यते।

§20§ परिभाषेन्दु चन्द्रिका

डा0 कीलहार्नप्रदर्शित तालिकयाऽवगम्यते यत् पण्डितबालशास्त्रिण: — शिष्येण श्रीमद् विश्वनाथभट्टेन परिभाषेन्दु चन्द्रिका नाम्नी एका टीकाऽत्र — लिखिता । लेखकस्य तत्कृतग्रन्थस्य वा विषये न किमपि प्राप्यते । काशीकी — पण्डितपरम्परा" नाम्निपुस्तके बलदेवोपाध्यायेनैतस्य विषये न किमपि लिख्यते। अत: ज्ञायते यदेतस्य कार्य-क्षेत्रं काश्या: भिन्नमासीदिति ।

§21§ शास्त्रार्थ कला

विजयाकारस्य श्री जयदेव मिश्रस्य शिष्येण पं० वेणीमाधव – शास्त्रिणा अत्र शास्त्रार्थकलेतिनाम्नी टीका सम्प्रति प्रकाश्यतामाप्यते । अस्यां टीकायां परिष्कार शैल्या: अनुसरणं दृश्यते ।

§22§ तत्त्वादर्शः

वासुदेव शास्त्री अभ्यंकर विरचिता तत्त्वादर्श नाम्नी टीकैका – परिभाषेन्दु शेखरे वरीवर्ति । डा० के० वी० अभ्यंकरमहानुभावेन सम्पादने – प्रकाशितोऽयं ग्रन्थः, छात्राणां कृते परमोपयोगी वर्तते । वासुदेव-शास्त्रिण: कार्य-क्षेत्रं महाराष्ट्रप्रदेशआसीत् । भास्कर-शास्त्री अभ्यंकर महानुभावस्य शिष्यस्य – श्री राम शास्त्री गडबोले महानुभावस्य शिष्योऽयमासीदिति । कीलहार्न-प्रदत्त-तालिकयाऽवगम्यते । अस्यैव तनयो डा० के०वी० अभ्यङ्कर आसीदिति अनेनात्र – विस्तर-भूमिकया आङ्गल-भाषामाध्यमेन विलिख्य सम्पादिता छात्रेभ्यश्च – परमोपयोगिनी । सम्प्रति सर्वत्र सौलभ्येन नाधिगम्यते । टीकेयं सम्पूर्णग्रन्थं – नाख्याति परन्तु क्वोऽप्यत्रैव परिभाषा तात्पर्यं सरलतया लेखकोऽत्र उपस्थापयति ।

§23§ परिभाषेन्दु शेखरस्याङ्गलभाषानुवाद:

पं० राघवेन्द्राचार्य पं० भास्कर शास्त्रिणो: शिष्यस्य श्रीमदनन्त – शास्त्रिण डा० कीलहार्नमहानुभाव: आङ्गलभाषायां विस्तरभूमिकया ग्रन्थस्यास्य – अनुवादमकरोत् योऽद्यापि प्राप्यते । डा० कीलहार्नमहानुभाव: पुण्यपत्तने संस्कृत –

विद्यालयस्य व्याकरणाध्यापकः आसीत् । अनेनैव सर्वप्रथमं स्वपुस्तके परिभाषेन्दु — शेखरस्य टीकासम्पत्ति विषयिकाचर्चा कृता अस्ति । अतोऽस्य ग्रन्थस्य महत्त्वं — सर्वाधिकं वर्तते । महाभाष्योद्धरण प्रदीपोद्धरणाभ्यां सह आङ्गलभाषामाध्यमेन — ग्रन्थोऽयं महदुपकरोति छात्रेभ्यो विपश्चिद्भ्यश्च/नागेशेन भाष्ये स्पष्टमिति — कैयट इत्यादि विलिख्य यद्दुट्टङ्कतं तद् विषयिणी आकांक्षाऽनेन ग्रन्थेन सर्वप्रथमं — शशाम ।

**(24)** परिभाषा प्रकाशः

नारायण मिश्र विरचित परिभाषाप्रकाशनाम्नी एका हिन्दी व्याख्या — प्रकाशिता सर्वत्रोपलभ्यते ।

**(25)** दुर्गा व्याख्या हिन्दी भाष्यंच

श्री लालबहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठस्य सम्मानित — प्राध्यापकेन डा० हर्षनाथ मिश्रेण परिभाषेन्दु शेखरे विस्तृता सरलाच दुर्गेति — नाम्नी व्याख्या संस्कृतेन छात्रेभ्यः हिन्दी भाष्यंच लिखिते ।

इयं दुर्गा व्याख्या परमोपयोगिनी वर्तते । अतिसरलया भाषया — लिखितेयं टीका गहनातिगहन भावाभिव्यक्तिसमर्था अस्ति । अत्र केचिदन्ये — इत्यादि शब्दैः येषां मतानां खण्डनं नागेशेन कृतं तेषां सर्वेषां पुरुषोत्तम देव — सीरदेवादीनां मतानि तत्तद्ग्रन्थेभ्यः अविकलानि प्रदत्तानिसन्ति/स्वमतखण्डने — नागेशेन यत्रयत्र महाभाष्यस्थलानामुपयोगः कृतः सर्वाण्यपि अत्राविकलानि — सन्तीति महत्त्वपूर्णेयं टीकेति ।

§26§ विषमी

अत्र परिभाषेन्दुशेखरे विषमीतिविद्रूपशर्म विरचिता अवाप्यते। कदापिदियमपि लोकप्रिया आसीदिति। भगवत्पतंजलिविरचित महाभाष्यस्य — छाया-टीकाभूमिकायां दाधिचो पाठयशिवदत्तेन कृत पर्यायाऽवगम्यते।

§27§ चित्प्रभा

पं0 ब्रह्मानन्द सरस्वती विरचिता अत्रैका टीका आसीद्यस्याः — नाम चित्प्रभेति।

§28§ काशिका

विद्यमान पायगुण्डे महानुभावेन गदातिरिक्ता काशिकेति नाम्नी — अपरा अपि व्याख्या परिभाषेन्दुशेखरस्य लिखितेति।भाष्यस्य-छाया-टीका — भूमिकायां शिवदत्त दाधिमथ-महाभागेन लिखितमस्ति। किन्तु डा0कीलहार्न — निर्दिष्ट तालिकायां " Gada or Kasika " गदा काशिका वेति — लिखितं प्राप्यते। येनानुमीयते यद् व्याख्या तु एकैवासीद तस्या द्वे नाम्नी — आस्तामिति। सम्प्रत्यपि एकैव टीका तस्यावाप्यते इति।

§29§ परिभाषार्थमंजरी

पं0 भीमभट्टेनापि अत्रैका टीका लिखिता। अस्याः टीकाया किं — नामेति नावगम्यते। दाधिमथ महाभागेन अस्याः टीकायाः उल्लेखः कृतः — अस्ति। सम्भवतः शंकरमिश्र विरचित टीकैव शंकरीति नाम्ना प्रसिद्धा।

(30) सर्वमङ्गला

पं० शेषशर्म महाभागेनात्र सर्वमङ्गलेति नाम्नी टीका टीकिता । इत्यपि दाधिमथोपाधि श्री शिवदत्तविरचितया छाया-टीकाभूमिकयाऽवगम्यते । कियद्भ्यः वर्षेभ्यः पूर्वं वाराणसीतः प्रकाशितेयं टीका ।

(31) विभूति

पं० शिवदत्त दाधिमथकृता विभूतीति नाम्नी टीका अत्रोपलभ्यते ।

(32) श्रीधरी

पं० जयदेव-मिश्र कृत विजया टीका भूमिकायां म०म०पं० उमेशमिश्रेण - श्रीधरीति व्याख्या विषये उल्लेखः विहितः । इयं श्रीधरी अपि प्रसिद्धा - आसीदिति तत्कृतोल्लेखेनावगम्यते ।

(33) जटाजूटः

पं० वेणीमाधव शास्त्रिविरचित शास्त्रार्थकला-भूमिकायां पाण्डेयोपाख्य - श्री रामकरण शास्त्रिण जटा-जूटेति नाम्न्याः परिभाषेन्दु-शेखर व्याख्यायाः - उल्लेखः तन्महत्त्वं तत्कालसमुपलभत्वंच सूचयति ।

(34) परिभाषेन्दु-शेखरस्य सुबोधिनी हिन्दी व्याख्या

इयं व्याख्या रचिता सम्प्रति संस्कृत-वैयाकरण-जगति परां ख्यातिमुपगता- वरीवर्ति । एतादृशी विद्वज्जन-मनो-हारिणीहिन्दी व्याख्या नाद्यावधि दृष्ट -

गोचरीभूता । अस्यां व्याख्यायां तान् सर्वानपि प्रयोगान् व्युत्पाद्य तत्सम्बन्धिनी-
चर्चा कृता वर्तते । परिभाषाणामुत्थानिकायां ये प्रयोगाः समागताः वर्तन्ते तेषां-
सर्वेषां साधुत्वावसरे कस्यां स्थितौ काः काः शंकाः समागताः ? कथं च ता -
उत्तारिताः इति निपुणं प्रतिपादितमस्यां टीकायाम् । मूलग्रन्थस्य सम्यकतया-
उद्घाटनपरेयं व्याख्या तादृशं वैशिष्ट्यं बिभर्ति येन कस्यापि परिभाषाबुभुत्सोः -
सन्देहो नावशिष्यते । सरलतया सुबोधतया भाषया विस्तरेण लिखितेयं-
व्याख्यापरिभाषेन्दुशेखरस्य तत्त्वावबोधने महदुपयोगिनी इति वदन्ति विज्ञाः ।
इत्थं परिभाषेन्दुशेखरस्य रचनाप्रभृत्यद्य पर्यन्तं व्याख्याः बुधैः क्रियन्ते । उत्तरोत्तर-
मेव तत्र विचार-विस्तारः समेषां व्याख्याकाराणां विचारसाम्येति तद्दर्शनेना-
वगन्तुं शक्यते । तत्रापि कासांचिद् टीकानामपूर्वं महत्त्वं विद्यते । तत्र गदाकारो -
नागेशस्य पट्ट-शिष्य आसीद । इत्थमपिश्रूयते यत् परिभाषेन्दुशेखरस्येयं -
गदा टीका एवेयं नागेशेनैवावलोकितेति । अतः परिभाषेन्दुशेखरस्याभिप्रायस्या-
भिव्यक्तिः नागेशसम्मतेति ग्रन्थोऽयमतीव महत्त्वपूर्णः । "अथ च केचिदन्ये"
इत्यादि वचोभिः नागेशेन पूर्ववर्तितानामाचार्याणां मतान्युद्धृत्य तेषां -
खण्डनं कृतमस्ति । तत्र केषांचिदिदं मतमिति नागेशेन नोल्लेखस्तत्र विहित इति
महत्ता अस्याः टीकायाः वर्द्धत एव ।

तत्र भूति विजयाटीकयोः स्थानम्

परिभाषेन्दु शेखरस्य यावत्यो व्याख्या अद्यावधि प्रकाशिता तावतीषु सर्वासुप्रकाशितासु व्याख्यासु सम्प्रति सर्वोत्कृष्टं स्थानं पण्डित-मण्डलीषु श्रीराम कृष्ण शास्त्रिणः भूतेरेव वर्तते, यद्यपि भूति व्याख्यानं – परिष्कार बहुलमतीव दुरूहं छात्रानुदवेलयति तथापि केचन तादृशा अपि – अंशाः सन्ति परिभाषेन्दु-शेखरस्य येषां सम्यग्ज्ञानं भूति व्याख्यानमन्तरा – न भवति । "अनेकान्ता अनुबन्धाः" "एकान्ताः अनुबन्धाः" इति परिभाषा-द्वय व्याख्याने या हयनुमान प्रक्रिया प्रदर्शिता भूतिकारेण तां विना परिभाषाशयो हृदयमवगाहयितुं न शक्यते जिज्ञासुभिः । एवं "व्यपदेशि-वदेकस्मिन्" इत्यस्याः परिभाषायाः व्याख्याने सूत्रकारवार्तिककार – भाष्यकाराणां मतानि यथायथं विविच्य सिद्धान्तपक्षं व्यवस्थापयता – टीकाकारेण श्रीराम कृष्णशास्त्रिणा प्रतिपाद्यो विषयः साधु प्रदर्शितः येन – मनागपि संशीति र्नावशिष्यते ।

परिभाषायास्स्व रूप निरूपणे श्रीमता शास्त्रिणा लौकिकं – तादृशमुदाहरणं प्रस्तुतं येन परिभाषायाः स्वरूपज्ञानमनायासेन सम्पद्येत । अप्रवृत्ति-स्थानानि च तानि तानि परिभाषाया उद्धृत्य परिभाषायाः – प्रतिपाद्य विषयः स्पष्टतां नीतः व्याख्यानेनानेन लौकिका अपि विषयाः – स्फुटं जायन्ते । तत्र ज्येष्ठत्वमध्यमत्वकनिष्ठत्वानि च परिष्कृत्य – एकस्मिन्नपि सत्यपिपुत्रे ज्येष्ठत्वं व्यवहर्तुं शक्यते, अनेकेषु च पुत्रेषु सत्सु –

प्रथम एव ज्येष्ठत्वं व्यवहर्तुं शक्यते इति च ज्ञानं सम्यग्भवति ।

किं बहुना "एकदेश विकृतमनन्यवत्" इति परिभाषा — व्याख्यानावसरे विकृतेनाप्येकदेशेन तत्त्व-व्यवहारस्य यदुदाहरणं व्याख्याकारेण प्रस्तुतं समन्वितं तेनापि परिभाषाया: लोकन्याय-सिद्धत्वं स्फुटं — प्रतीयते । एवमेव "येन नाप्राप्ते यो विधिरारभ्यते स तस्यबाधको भवति — इति न्यायं व्याचक्षाणेन शास्त्रिणा चतुर्णां बाधबीजानां समीचीनान्युदाहरणानि प्रदश्र्य न्यायस्यास्य विषय: स्पष्टतां नीत: ।

इत्थं ताव्याशास्त्रयपर-नामधेय श्री रामकृष्णशास्त्रि विरचितं — भूतितिलकं, श्री जयदेव-मिश्र-विरचिता विजया सम्प्रति संस्कृत-बुधजनसमाजे — पठनपाठन द्वारा प्रसिद्धिमातनुत: । अन्याश्च व्याख्या: ग्रन्थालयस्य — शोभां वर्धयन्तो न प्रसिद्धिंप्राप्ता: ।

भूति-तिलकं परिष्कार विषये तिलकायमानमपि परिभाषेन्दु-शेखरग्रन्थस्य मूलं मनागेव स्पृशति । अतोऽन्तेवासिनां दुरूहार्थतां भजति, विजया च विजयेव छात्रान् - अर्थावबोधे परिभ्रमयति । ततश्च छात्राणां — यावानुपकार: अपेक्ष्यमाण आसीत् न तावानुपकारो जात: ।